# श्रीमद् भागवत रसिक कुटुंब

## ॥ श्री गीत गोविंद॥



### ॥ द्वितीयः सर्गः॥(अक्लेशकेशवः)

**श्लोकः ॥**

**विहरति वने राधा साधारणप्रणये हरौ**
**विगलितनिजोत्कर्षादीर्ष्यावशेन गतान्यतः ।**
**क्वचिदपि लताकुञ्जे गुञ्जन्मधुव्रतमण्डली-**
**मुखरशिखरे लीना दीनाप्युवाच रहः(स्) सखीम् ॥ 1॥**

### ॥ गीतम् 5 ॥

**(अथ पञ्चमप्रबन्धो गुर्जरीरागेण रूपकताले गीयते)**

**सं(ञ्)चरदधरसुधामधुरध्वनिमुखरितमोहनवं(म्)शम् ।**
**चलितदृगञ्चलचञ्चलमौलिकपोलविलोलवतंसम् ।**
**रासे हरिमिह विहितविलासं(म्)**
**स्मरति मनो मम कृतपरिहासम् ॥ ध्रुवम्॥1॥**

**चन्द्रकचारुमयूरशिखण्डकमण्डलवलयितकेशम् ।**
**प्रचुरपुरन्दरधनुरनुरञ्जितमेदुरमुदिरसुवेशम् ॥ 2॥ रासे हरिमिह**

गोपकदम्बनितम्बवतीमुखचुम्बनलम्भितलोभम् ।
बन्धुजीवमधुराधरपल्लवमुल्लसितस्मितशोभम् ॥ 3॥ रासे हरिमिह

विपुलपुलकभुजपल्लववलयितवल्लवयुवतिसहस्रम् ।
करचरणोरसि मणिगणभूषणकिरणविभिन्नतमिस्रम् ॥ 4॥ रासे हरिमिह

जलदपटलचलदिन्दुविनिदकचन्दनतिलकललाटम् ।
पीनपयोधरपरिसरमर्दननिर्दयहृदयकपाटम् ॥ 5॥ रासे हरिमिह

मणिमयमकरमनोहरकुण्डलमण्डितगण्डमुदारम् ।
पीतवसनमनुगतमुनिमनुजसुरासुरवरपरिवारम् ॥ 6॥ रासे हरिमिह

विशदकदम्बतले मिलितं(ङ्) कलिकलुषभयं(म्) शमयन्तम् ।
मामपि किमपि तरङ्गदनङ्गदृशा मनसा रमयन्तम् ॥ 7॥ रासे हरिमिह

श्रीजयदेवभणितमतिसुन्दरमोहनमधुरिपुरूपम् ।
हरिचरणस्मरणं(म्) प्रति सम्प्रति पुण्यवतामनुरूपम् ॥ 8॥ रासे हरिमिह

इति श्रीगीतगोविन्दे पञ्चमः प्रबन्धः

(हरिणी)

गणयति गुणग्रामं(म्) भ्रामं(म्) भ्रमादपि नेहते

वहति च परितोषं(न्) दोषं(वँ्) विमुञ्चति दूरतः ।
युवतिषु वलत्तृष्णे कृष्णे विहारिणि मां(वँ्) विना
पुनरपि मनो वामं(ङ्) कामं(ङ्) करोति करोमि किम् ॥ 1॥

## ॥ गीतम् 6 ॥

(अथ षष्ठप्रबन्धो मालवरागेण एकतालीताले गीयते)
निभृतनिकुञ्जगृहं(ङ्) गतया निशि रहसि निलीय वसन्तम् ।
चकितविलोकितसकलदिशा रतिरभसरसेन हसन्तम् ॥
सखि हे केशिमथनमुदारं(म्)॥
रमय मया सह मदनमनोरथभावितया सविकारम् ॥ 1॥

प्रथमसमागमलज्जितया पटुचाटुशतैरनुकूलम् ।
मृदुमधुरस्मितभाषितया शिथिलीकृतजघनदुकूलम् ॥ 2॥ सखि हे

किसलयशयननिवेशितया चिरमुरसि ममैव शयानम् ।
कृतपरिरम्भणचुम्बनया परिरभ्य कृताधरपानम् ॥ 3॥ सखि हे

अलसनिमीलितलोचनया पुलकावलिललितकपोलम् ।
श्रमजलसकलकलेवरया वरमदनमदादतिलोलम् ॥ 4॥ सखि हे

कोकिलकलरवकूजितया जितमनसिजतन्त्रविचारम् ।
श्लथकुसुमाकुलकुन्तलया नखलिखितघनस्तनभारम् ॥ 5॥ सखि हे

चरणरणितमणिनूपुरया परिपूरितसुरतवितानम् ।
मुखरविशृङ्खलमेखलया सकचग्रहचुम्बनदानम् ॥ 6॥ सखि हे

रतिसुखसमयरसालसया दरमुकुलितनयनसरोजम् ।
निः(स्)सहनिपतिततनुलतया मधुसूदनमुदितमनोजम् ॥ 7॥ सखि हे

श्रीजयदेवभणितमिदमतिशयमधुरिपुनिधुवनशीलम् ।
सुखमुत्कण्ठितगोपवधूकथितं(वँ्) वितनोतु सलीलम् ॥ 8॥  सखि हे

इति श्रीगीतगोविन्दे षष्ठः प्रबन्धः

(शार्दूलविक्रीडितेन)

हस्तस्रस्तविलासवं(म्)शमनृजुभ्रूवल्लिमद्बल्लवी-
वृन्दोत्सारिदृगन्तवीक्षितमतिस्वेदार्द्रगण्डस्थलम् ।
मामुद्वीक्ष्य विलक्षितं(म्) स्मितसुधामुग्धाननं(ङ्) कानने
गोविन्दं(वँ्) व्रजसुन्दरीगणवृतं(म्) पश्यामि हृष्यामि च ॥ 1॥

(शिखरिणी)

दुरालोकस्तोकस्तबकनवकाशोकलतिका-
विकासः(ख्) कासारोपवनपवनोऽपि व्यथयति ।
अपि भ्राम्यद्भृङ्गीरणितरमणीया न मुकुल-
प्रसूतिश्चूतानां(म्) सखि शिखरिणीयं(म्) सुखयति ॥ 2॥

(शार्दूलविक्रीडितेन)

**साकूतस्मितमाकुलाकुलगलद्धम्मिल्लमुल्लासित-**

**भ्रूवल्लीकमलीकदर्शितभुजामूलार्द्धपृष्ठस्तनम् ।**

**गोपीनां(न्) निभृतं(न्) निरीक्ष्य गमिता काङ्क्षश्चिरं(ञ्) चिन्तयन्-**

**नन्तर्मुग्धमनोहरं(म्) हरतु वः(ख्) क्लेशं(न्) न वः(ख्) केशवः ॥ 3॥**

**॥ इति गीतगोविन्दे अक्लेशकेशवो नाम द्वितीयः सर्गः ॥**

